# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (५)

२३.०७.२०१०

# पुनरावर्तनम्

- ह्रस्व-दीर्घ-प्लुताः,
- उदात्त-अनुदात्त-स्वरिताः

स नवविधोऽपि अनुनासिक-अननुनासिकत्वाभ्यां द्विधा ।

# ९. मुखनासिकावचनोऽनुनासिकः (१.१.८)

- पदद्वयम् । मुख-नासिका-वचनः, अनुनासिकः
- मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिकसंज्ञः स्यात् ।
- तदित्थम् – अ, इ, उ, ऋ – एषां वर्णानां प्रत्येकम् अष्टादश भेदाः ।
- ऌवर्णस्य द्वादश । तस्य दीर्घाभावात् ।
  एचामपि द्वादश । तेषां ह्रस्वाभावात् ।

- अ – १८
- इ – १८
- उ – १८
- ऋ – १८
- ऌ – १२
- ए – १२
- ओ – १२
- ऐ – १२
- औ – १२
- आहत्य – १३२ स्वराः ।

# १०. तुल्यास्यप्रयत्नं सवर्णम् (१.१.९)

- पदद्वयम् । तुल्य-आस्य-प्रयत्नं, सवर्णम् ।
- ताल्वादिस्थानम् आभ्यन्तरप्रयत्नश्च यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।

# स्थानानि

- अकुहविसर्जनीयानां कण्ठः – अ, क्, ख्, ग्, घ्, ङ्, ह्, ः
- इचुयशानां तालु – इ, च्, छ्, ज्, झ्, ञ्, य्, श्
- ऋटुरषाणां मूर्धा
- ऌतुलसानां दन्ताः
- उपूपध्मानीयानामोष्ठौ
- ञमङणनानां नासिका च – ञ = तालु+नासिका, म = ओष्ठौ+नासिका

- एदैतोः कण्ठतालु
- ओदौतोः कण्ठोष्ठम्
- वकारस्य दन्तोष्ठम्
- जिह्वामूलीयस्य जिह्वामूलम् -
- नासिकानुस्वारस्य
- इति स्थानानि ।

- यत्नः द्विधा – आभ्यन्तरो बाह्यश्च ।
- आद्यः चतुर्धा ।

१) स्पृष्टः – क् - म्

२) ईषत्स्पृष्टः – य्, र्, ल्, व्

३) विवृतः – श्, ष्, स्, ह्, स्वराः

४) संवृतः – ह्रस्वस्य अवर्णस्य प्रयोगे ।

# ११. अ अ (८.४.६८)

- विवृतम् अनूद्य संवृतः अनेन विधीयते ।
- अस्य च अष्टाध्यायीं सम्पूर्णां प्रति असिद्धत्वात् शास्त्रदृष्ट्या विवृतत्वम् अस्त्येव ।

# १२. पूर्वत्रासिद्धम् (८.२.१)

- पदद्वयम् । पूर्वत्र, असिद्धम् ।
- अधिकारोऽयम् । तेन सपादसप्ताध्यायीं प्रति त्रिपादी असिद्धा । त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रम् असिद्धं स्यात् ।

अष्टाध्यायी (१.१.१ – ८.४.६८)

सपादसप्ताध्यायी (१.१.१ – ८.१.७४)    त्रिपादी (८.२.१-८.४.६८)